એતાવાનેવ લોકેઽસ્મિન્ પુંસઃ સ્વાર્થઃ પરઃ સ્મૃતઃ ।
એકાન્તભક્તિર્ગોવિન્દે યત્સર્વત્ર તદીક્ષણમ્ ॥ ૫૫॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં સપ્તમસ્કન્ધે
પ્રહ્લાદાનુચરિતે દૈત્યપુત્રાનુશાસનં નામ સપ્તમોઽધ્યાયઃ ॥ ૭॥

## ॥ ૐ નમો ભગવતે વાસુદેવાય ॥

## ॥ અષ્ટમોઽધ્યાયઃ - ૮ ॥

નારદ ઉવાચ
અથ દૈત્યસુતાઃ સર્વે શ્રુત્વા તદનુવર્ણિતમ્ ।
જગૃહુર્નિરવદ્યત્વાન્નૈવ ગુર્વનુશિક્ષિતમ્ ॥ ૧॥

અથાચાર્યસુતસ્તેષાં બુદ્ધિમેકાન્તસંસ્થિતામ્ ।
આલક્ષ્ય ભીતસ્ત્વરિતો રાજ્ઞ આવેદયદ્યથા ॥ ૨॥

શ્રુત્વા તદપ્રિયં દૈત્યો દુઃસહં તનયાનયમ્ ।
કોપાવેશચલદ્ગાત્રઃ પુત્રં હન્તું મનો દધે ॥ ૩॥

ક્ષિપ્ત્વા પરુષયા વાચા પ્રહ્લાદમતદર્હણમ્ ।
આહેક્ષમાણઃ પાપેન તિરશ્ચીનેન ચક્ષુષા ॥ ૪॥

પ્રશ્રયાવનતં દાન્તં બદ્ધાઞ્જલિમવસ્થિતમ્ ।
સર્પઃ પદાહત ઇવ શ્વસન્ પ્રકૃતિદારુણઃ ॥ ૫॥

હે દુર્વિનીત મન્દાત્મન્ કુલભેદકરાધમ ।
સ્તબ્ધં મચ્છાસનોદ્ધૃતં નેષ્યે ત્વાદ્ય યમક્ષયમ્ ॥ ૬॥

ક્રુદ્ધસ્ય યસ્ય કમ્પન્તે ત્રયો લોકાઃ સહેશ્વરાઃ ।
તસ્ય મેઽભીતવન્મૂઢ શાસનં કિં બલોઽત્યગાઃ ॥ ૭॥

પ્રહ્લાદ ઉવાચ
ન કેવલં મે ભવતશ્ચ રાજન્
સ વૈ બલં બલિનાં ચાપરેષામ્ ।

એવં સ્વકર્મપતિતં ભવવૈતરણ્યા-
મન્યોન્યજન્મમરણાશનભીતભીતમ્ ।
પશ્યન્ જનં સ્વપરવિગ્રહવૈરમૈત્રં
હન્તેતિ પારચર પીપૃહિ મૂઢમદ્ય ॥ ૪૧॥

કો ન્વત્ર તેઽખિલગુરો ભગવન્ પ્રયાસ
ઉત્તારણેઽસ્ય ભવસમ્ભવલોપહેતોઃ ।
મૂઢેષુ વૈ મહદનુગ્રહ આર્તબન્ધો
કિં તેન તે પ્રિયજનાનનુસેવતાં નઃ ॥ ૪૨॥

નૈવોદ્વિજે પર દુરત્યયવૈતરણ્યા-
સ્ત્વદ્વીર્યગાયનમહામૃતમગ્નચિત્તઃ ।
શોચે તતો વિમુખચેતસ ઇન્દ્રિયાર્થ-
માયાસુખાય ભરમુદ્વહતો વિમૂઢાન્ ॥ ૪૩॥

પ્રાયેણ દેવ મુનયઃ સ્વવિમુક્તિકામાઃ
મૌનં ચરન્તિ વિજને ન પરાર્થનિષ્ઠાઃ ।
નૈતાન્વિહાય કૃપણાન્વિમુમુક્ષ એકો
નાન્યં ત્વદસ્ય શરણં ભ્રમતોઽનુપશ્યે ॥ ૪૪॥

યન્મૈથુનાદિગૃહમેધિસુખં હિ તુચ્છં
કણ્ડૂયનેન કરયોરિવ દુઃખદુઃખમ્ ।
તૃપ્યન્તિ નેહ કૃપણા બહુદુઃખભાજઃ
કણ્ડૂતિવન્મનસિજં વિષહેત ધીરઃ ॥ ૪૫॥

મૌનવ્રતશ્રુતતપોઽધ્યયનસ્વધર્મ-
વ્યાખ્યારહોજપસમાધય આપવર્ગ્યાઃ ।
પ્રાયઃ પરં પુરુષ તે ત્વજિતેન્દ્રિયાણાં
વાર્તા ભવન્ત્યુત ન વાત્ર તુ દામ્ભિકાનામ્ ॥ ૪૬॥

રૂપે ઇમે સદસતી તવ વેદસૃષ્ટે
બીજાઙ્કુરાવિવ ન ચાન્યદરૂપકસ્ય ।
યુક્તાઃ સમક્ષમુભયત્ર વિચિન્વતે ત્વાં
યોગેન વહ્નિમિવ દારુષુ નાન્યતઃ સ્યાત્ ॥ ૪૭॥

ત્વં વાયુરગ્નિરવનિર્વિયદમ્બુમાત્રાઃ

ધર્મમૂલં હિ ભગવાન્ સર્વવેદમયો હરિઃ ।
સ્મૃતં ચ તદ્વિદાં રાજન્ યેન ચાત્મા પ્રસીદતિ ॥ ૭॥

સત્યં દયા તપઃ શૌચં તિતિક્ષેક્ષા શમો દમઃ ।
અહિંસા બ્રહ્મચર્યં ચ ત્યાગઃ સ્વાધ્યાય આર્જવમ્ ॥ ૮॥

સન્તોષઃ સમદૃક્સેવા ગ્રામ્યેહોપરમઃ શનૈઃ ।
નૃણાં વિપર્યયેહેક્ષા મૌનમાત્મવિમર્શનમ્ ॥ ૯॥

અન્નાદ્યાદેઃ સંવિભાગો ભૂતેભ્યશ્ચ યથાર્હતઃ ।
તેષ્વાત્મદેવતાબુદ્ધિઃ સુતરાં નૃષુ પાણ્ડવ ॥ ૧૦॥

શ્રવણં કીર્તનં ચાસ્ય સ્મરણં મહતાં ગતેઃ ।
સેવેજ્યાવનતિર્દાસ્યં સખ્યમાત્મસમર્પણમ્ ॥ ૧૧॥

નૃણામયં પરો ધર્મઃ સર્વેષાં સમુદાહૃતઃ ।
ત્રિંશલ્લક્ષણવાન્ રાજન્ સર્વાત્મા યેન તુષ્યતિ ॥ ૧૨॥

સંસ્કારા યદવિચ્છિન્નાઃ સ દ્વિજોઽજો જગાદ યમ્ ।
ઇજ્યાધ્યયનદાનાનિ વિહિતાનિ દ્વિજન્મનામ્ ।
જન્મકર્માવદાતાનાં ક્રિયાશ્ચાશ્રમચોદિતાઃ ॥ ૧૩॥

વિપ્રસ્યાધ્યયનાદીનિ ષડન્યસ્યાપ્રતિગ્રહઃ ।
રાજ્ઞો વૃત્તિઃ પ્રજાગોપ્તુરવિપ્રાદ્વા કરાદિભિઃ ॥ ૧૪॥

વૈશ્યસ્તુ વાર્તાવૃત્તિશ્ચ નિત્યં બ્રહ્મકુલાનુગઃ ।
શૂદ્રસ્ય દ્વિજશુશ્રૂષા વૃત્તિશ્ચ સ્વામિનો ભવેત્ ॥ ૧૫॥

વાર્તા વિચિત્રા શાલીનયાયાવરશિલોઞ્છનમ્ ।
વિપ્રવૃત્તિશ્ચતુર્ધેયં શ્રેયસી ચોત્તરોત્તરા ॥ ૧૬॥

જઘન્યો નોત્તમાં વૃત્તિમનાપદિ ભજેન્નરઃ ।
ઋતે રાજન્યમાપત્સુ સર્વેષામપિ સર્વશઃ ॥ ૧૭॥

ઋતામૃતાભ્યાં જીવેત મૃતેન પ્રમૃતેન વા ।
સત્યાનૃતાભ્યાં જીવેત ન શ્વવૃત્ત્યા કથઞ્ચન ॥ ૧૮॥

ઋતમુઞ્છશિલં પ્રોક્તમમૃતં યદયાચિતમ્ ।
મૃતં તુ નિત્યયાચ્ઞા સ્યાત્પ્રમૃતં કર્ષણં સ્મૃતમ્ ॥ ૧૯॥

ચરેદ્વને દ્વાદશાબ્દાનષ્ટૌ વા ચતુરો મુનિઃ ।
દ્વાવેકં વા યથા બુદ્ધિર્ન વિપદ્યેત કૃચ્છ્રતઃ ॥ ૨૨॥

યદાકલ્પઃ સ્વક્રિયાયાં વ્યાધિભિર્જરયાથવા ।
આન્વીક્ષિક્યાં વા વિદ્યાયાં કુર્યાદનશનાદિકમ્ ॥ ૨૩॥

આત્મન્યગ્નીન્ સમારોપ્ય સન્ન્યસ્યાહમ્મમાત્મતામ્ ।
કારણેષુ ન્યસેત્સમ્યક્ સઙ્ઘાતં તુ યથાર્હતઃ ॥ ૨૪॥

ખે ખાનિ વાયૌ નિશ્વાસાંસ્તેજસ્યૂષ્માણમાત્મવાન્ ।
અપ્સ્વસૃક્શ્લેષ્મપૂયાનિ ક્ષિતૌ શેષં યથોદ્ભવમ્ ॥ ૨૫॥

વાચમગ્નૌ સવક્તવ્યામિન્દ્રે શિલ્પં કરાવપિ ।
પદાનિ ગત્યા વયસિ રત્યોપસ્થં પ્રજાપતૌ ॥ ૨૬॥

મૃત્યૌ પાયું વિસર્ગં ચ યથાસ્થાનં વિનિર્દિશેત્ ।
દિક્ષુ શ્રોત્રં સનાદેન સ્પર્શમધ્યાત્મનિ ત્વચમ્ ॥ ૨૭॥

રૂપાણિ ચક્ષુષા રાજન્ જ્યોતિષ્યભિનિવેશયેત્ ।
અપ્સુ પ્રચેતસા જિહ્વાં ઘ્રેયૈર્ઘ્રાણં ક્ષિતૌ ન્યસેત્ ॥ ૨૮॥

મનો મનોરથૈશ્ચન્દ્રે બુદ્ધિં બોધ્યૈઃ કવૌ પરે ।
કર્માણ્યધ્યાત્મના રુદ્રે યદહમ્મમતાક્રિયા ।
સત્ત્વેન ચિત્તં ક્ષેત્રજ્ઞે ગુણૈર્વૈકારિકં પરે ॥ ૨૯॥

અપ્સુ ક્ષિતિમપો જ્યોતિષ્યદો વાયૌ નભસ્યમુમ્ ।
કૂટસ્થે તચ્ચ મહતિ તદવ્યક્તેઽક્ષરે ચ તત્ ॥ ૩૦॥

ઇત્યક્ષરતયાઽઽત્માનં ચિન્માત્રમવશેષિતમ્ ।
જ્ઞાત્વાદ્વયોઽથ વિરમેદ્દગ્ધયોનિરિવાનલઃ ॥ ૩૧॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં સપ્તમસ્કન્ધે
યુધિષ્ઠિરસંવાદે સદાચારનિર્ણયો નામ દ્વાદશોઽધ્યાયઃ ॥ ૧૨॥

## ॥ ૐ નમો ભગવતે વાસુદેવાય ॥

